# श्रीरामसहस्रनामम् श्रीमदानन्दरामायणे

{॥ श्रीरामसहस्रनामम् श्रीमदानन्दरामायणे ॥}

श्रीपार्वत्युवाच

श्रोतुमिच्छामि देवेश तदहं सर्वकामदम् ।

नाम्नां सहस्रं मां ब्रूहि यदस्ति मयि ते दया ॥ २८॥

श्रीमहादेव उवाच

अथ वक्ष्यामि भो देवि रामनामसहस्रकम् ।

शृणुष्वैकमनाः स्तोत्रं गुह्याद्गुह्यतरं महत् ॥ २९॥

ऋषिर्विनायकश्चास्य ह्यनुष्टुप् छन्द उच्यते ।

परब्रह्मात्मको रामो देवता शुभदर्शने ॥ ३०॥

ॐ अस्य श्रीरामसहस्रनाममालामन्त्रस्य विनायक ऋषिः ।

अनुष्टुप् छन्दः । श्रीरामो देवता ।

महाविष्णुरिति बीजम् । गुणभृन्निर्गुणो महानिति शक्तिः ।

सच्चिदानन्दविग्रह इति कीलकम् ।

श्रीरामप्रीत्यर्थे जपे विनियोगः ॥

आङ्गुलिन्यासः

ॐ श्रीरामचन्द्राय अङ्गुष्ठाभ्यां नमः ।

सीतापतये तर्जनीभ्यां नमः ।

रघुनाथाय मध्यमाभ्यां नमः ।

भरताग्रजाय अनामिकाभ्यां नमः ।

दशरथात्मजाय कनिष्ठिकाभ्यां नमः ।

हनुमत्प्रभवे करतलकरपृष्ठाभ्यां नमः ॥

हृदयादिन्यासः

ॐ श्रीरामचन्द्राय हृदयाय नमः ।

सीतापतये शिरसे स्वाहा ।

रघुनाथाय शिखायै वषट् ।

भरताग्रजाय कवचाय हुम् ।

दशरथात्मजाय नेत्रत्रयाय वौषट् ।

हनुमत्प्रभवे अस्त्राय फट् ॥

अथ ध्यानम् ।

ध्यायेदाजानुबाहुं धृतशरधनुषं बद्धपद्मासनस्थं

पीतं वासो वसानं नवकमलस्पर्धि नेत्रं प्रसन्नम् ।

वामाङ्कारूढसीतामुखकमलमिलल्लोचनं नीरदाभं

नानालङ्कारदीप्तं दधतमुरुजटामण्डलं रामचन्द्रम् ॥ ३१॥

वैदेहीसहितं सुरद्रुमतले हैमे महामण्डपे

मध्ये पुष्पकमासने मणिमये वीरासने संस्थितम् ।

अग्रे वाचयति प्रभञ्जनेसुते तत्त्वं मुनिभ्यः परं
व्याख्यान्तं भरतादिभिः परिवृतं रामं भजे श्यामलम् ॥ ३२॥

सौवर्णमण्डपे दिव्ये पुष्पके सुविराजिते ।
मूले कल्पतरोः स्वर्णपीठे सिंहाष्टसंयुते ॥ ३३॥

मृदुश्लक्ष्णतरे तत्र जानक्या सह संस्थितम् ।
रामं नीलोत्पलश्यामं द्विभुजं पीतवाससम् ॥ ३४॥

स्मितवक्त्रं सुखासीनं पद्मपत्रनिभेक्षणम् ।
किरीटहारकेयूरकुण्डलैः कटकादिभिः ॥ ३५॥

भ्राजमानं ज्ञानमुद्राधरं वीरासनस्थितम् ।
स्पृशन्तं स्तनयोरग्रे जानक्याः सव्यपाणिना ॥ ३६॥

वसिष्ठवामदेवाद्यैः सेवितं लक्ष्मणादिभिः ।
अयोध्यानगरे रम्ये ह्यभिषिक्तं रघूद्वहम् ॥ ३७॥

एवं ध्यात्वा जपेन्नित्यं रामनामसहस्रकम् ।
हत्याकोटियुतो वापि मुच्यते नात्र संशयः ॥ ३८॥

(अथ सहस्रनाम स्तोत्र प्रारम्भः ।)

ॐ रामः श्रीमान्महाविष्णुर्जिष्णुर्देवहितावहः ।

तत्त्वात्मा तारकब्रह्म शाश्वतः सर्वसिद्धिदः ॥ ३९॥

राजीवलोचनः श्रीमान् श्रीरामो रघुपुङ्गवः ।

रामभद्रः सदाचारो राजेन्द्रो जानकीपतिः ॥ ४०॥

अग्रगण्यो वरेण्यश्च वरदः परमेश्वरः ।

जनार्दनो जितामित्रः परार्थैकप्रयोजनः ॥ ४१॥

विश्वामित्रप्रियो दाता शत्रुजिच्छत्रुतापनः ।

सर्वज्ञः सर्ववेदादिः शरण्यो वालिमर्दनः ॥ ४२॥

ज्ञानभव्योऽपरिच्छेद्यो वाग्मी सत्यव्रतः शुचिः ।

ज्ञानगम्यो दृढप्रज्ञः खरध्वंसः प्रतापवान् ॥ ४३॥

द्युतिमानात्मवान् वीरो जितक्रोधोऽरिमर्दनः ।

विश्वरूपो विशालाक्षः प्रभुः परिवृढो दृढः ॥ ४४॥

ईशः खड्गधरः श्रीमान् कौसल्येयोऽनसूयकः ।

विपुलांसो महोरस्कः परमेष्ठी परायणः ॥ ४५॥

सत्यव्रतः सत्यसन्धो गुरुः परमधार्मिकः ।

लोकेशो लोकवन्द्यश्च लोकात्मा लोककृद्विभुः ॥ ४६॥

अनादिर्भगवान् सेव्यो जितमायो रघूद्वहः ।

रामो दयाकरो दक्षः सर्वज्ञः सर्वपावनः ॥ ४७॥

ब्रह्मण्यो नीतिमान् गोप्ता सर्वदेवमयो हरिः ।

सुन्दरः पीतवासाश्च सूत्रकारः पुरातनः ॥ ४८॥

सौम्यो महर्षिः कोदण्डः सर्वज्ञः सर्वकोविदः ।

कविः सुग्रीववरदः सर्वपुण्याधिकप्रदः ॥ ४९॥

भव्यो जितारिषड्वर्गो महोदारोऽघनाशनः ।

सुकीर्तिरादिपुरुषः कान्तः पुण्यकृतागमः ॥ ५०॥

अकल्मषश्चतुर्बाहुः सर्वावासो दुरासदः । 100

स्मितभाषी निवृत्तात्मा स्मृतिमान् वीर्यवान् प्रभुः ॥ ५१॥

धीरो दान्तो घनश्यामः सर्वायुधविशारदः ।

अध्यात्मयोगनिलयः सुमना लक्ष्मणाग्रजः ॥ ५२॥

सर्वतीर्थमयः शूरः सर्वयज्ञफलप्रदः ।

यज्ञस्वरूपो यज्ञेशो जरामरणवर्जितः ॥ ५३॥

वर्णाश्रमगुरुर्वर्णी शत्रुजित्पुरुषोत्तमः ।

शिवलिङ्गप्रतिष्ठाता परमात्मा परापरः ॥ ५४॥

प्रमाणभूतो दुर्ज्ञेयः पूर्णः परपुरञ्जयः ।

अनन्तदृष्टिरानन्दो धनुर्वेदो धनुर्धरः ॥ ५५॥

गुणाकारो गुणश्रेष्ठः सच्चिदानन्दविग्रहः ।

अभिवाद्यो महाकायो विश्वकर्मा विशारदः ॥ ५६॥

विनीतात्मा वीतरागस्तपस्वीशो जनेश्वरः ।

कल्याणः प्रह्वतिः कल्पः सर्वेशः सर्वकामदः ॥ ५७॥

अक्षयः पुरुषः साक्षी केशवः पुरुषोत्तमः ।

लोकाध्यक्षो महाकार्यो विभीषणवरप्रदः ॥ ५८॥

आनन्दविग्रहो ज्योतिर्हनुमत्प्रभुरव्ययः ।

भ्राजिष्णुः सहनो भोक्ता सत्यवादी बहुश्रुतः ॥ ५९॥

सुखदः कारणं कर्ता भवबन्धविमोचनः ।

देवचूडामणिर्नेता ब्रह्मण्यो ब्रह्मवर्धनः ॥ ६०॥

संसारतारको रामः सर्वदुःखविमोक्षकृत् ।

विद्वत्तमो विश्वकर्ता विश्वकृद्विश्वकर्म च ॥ ६१॥

नित्यो नियतकल्याणः सीताशोकविनाशकृत् ।

काकुत्स्थः पुण्डरीकाक्षो विश्वामित्रभयापहः ॥ ६२॥

मारीचमथनो रामो विराधवधपण्डितः ।

दुःस्वप्ननाशनो रम्यः किरीटी त्रिदशाधिपः ॥ ६३॥

महाधनुर्महाकायो भीमो भीमपराक्रमः ।

तत्त्वस्वरूपस्तत्त्वज्ञस्तत्त्ववादी सुविक्रमः ॥ ६४॥

भूतात्म भूतकृत्स्वामी कालज्ञानी महावपुः ।

अनिर्विण्णो गुणग्रामो निष्कलङ्कः कलङ्कहा ॥ ६५॥

स्वभावभद्रः शत्रुघ्नः केशवः स्थाणुरीश्वरः ।

भूतादिः शंभुरादित्यः स्थविष्ठः शाश्वतो ध्रुवः ॥ ६६॥

कवची कुण्डली चक्री खड्गी भक्तजनप्रियः ।

अमृत्युर्जन्मरहितः सर्वजित्सर्वगोचरः ॥ ६७॥

अनुत्तमोऽप्रमेयात्मा सर्वात्मा गुणसागरः । 200

रामः समात्मा समगो जटामुकुटमण्डितः ॥ ६८॥

अजेयः सर्वभूतात्मा विष्वक्सेनो महातपाः ।

लोकाध्यक्षो महाबाहुरमृतो वेदवित्तमः ॥ ६९॥

सहिष्णुः सद्गतिः शास्ता विश्वयोनिर्महाद्युतिः ।

अतीन्द्र ऊर्जितः प्रांशुरुपेन्द्रो वामनो बलिः ॥ ७०॥

धनुर्वेदो विधाता च ब्रह्मा विष्णुश्च शङ्करः ।

हंसो मरीचिर्गोविन्दो रत्नगर्भो महद्द्युतिः ॥ ७१॥ var महाद्युतिः

व्यासो वाचस्पतिः सर्वदर्पितासुरमर्दनः ।

जानकीवल्लभः श्रीमान् प्रकटः प्रीतिवर्धनः ॥ ७२॥

संभवोऽतीन्द्रियो वेद्यो निर्देशो जाम्बवत्प्रभुः ।

मदनो मन्मथो व्यापी विश्वरूपो निरञ्जनः ॥ ७३॥

नारायणोऽग्रणी साधुर्जटायुप्रीतिवर्धनः ।

नैकरूपो जगन्नाथः सुरकार्यहितः प्रभुः ॥ ७४॥

जितक्रोधो जितारातिः प्लवगाधिपराज्यदः ।

वसुदः सुभुजो नैकमायो भव्यः प्रमोदनः ॥ ७५॥

चण्डांशुः सिद्धिदः कल्पः शरणागतवत्सलः ।

अगदो रोगहर्ता च मन्त्रज्ञो मन्त्रभावनः ॥ ७६॥

सौमित्रिवत्सलो धुर्यो व्यक्ताव्यक्तस्वरूपधृक् ।
वसिष्ठो ग्रामणीः श्रीमाननुकूलः प्रियंवदः ॥ ७७॥

अतुलः सात्त्विको धीरः शरासनविशारदः ।
ज्येष्ठः सर्वगुणोपेतः शक्तिमांस्ताटकान्तकः ॥ ७८॥

वैकुण्ठः प्राणिनां प्राणः कमलः कमलाधिपः ।
गोवर्धनधरो मत्स्यरूपः कारुण्यसागरः ॥ ७९॥

कुम्भकर्णप्रभेत्ता च गोपिगोपालसंवृतः । 300
मायावी व्यापको व्यापी रेणुकेयबलापहः ॥ ८०॥

पिनाकमथनो वन्द्यः समर्थो गरुडध्वजः ।
लोकत्रयाश्रयो लोकभरितो भरताग्रजः ॥ ८१॥

श्रीधरः सङ्गतिर्लोकसाक्षी नारायणो विभुः ।
मनोरूपी मनोवेगी पूर्णः पुरुषपुङ्गवः ॥ ८२॥

यदुश्रेष्ठो यदुपतिर्भूतावासः सुविक्रमः ।
तेजोधरो धराधरश्चतुर्मूर्तिर्महानिधिः ॥ ८३॥

चाणूरमथनो वन्द्यः शान्तो भरतवन्दितः ।

शब्दातिगो गभीरात्मा कोमलाङ्गः प्रजागरः ॥ ८४॥

लोकोर्ध्वगः शेषशायी क्षीराब्धिनिलयोऽमलः ।

आत्मज्योतिरदीनात्मा सहस्रार्चिः सहस्रपात् ॥ ८५॥

अमृतांशुर्महीगर्तो निवृत्तविषयस्पृहः ।

त्रिकालज्ञो मुनिः साक्षी विहायसगतिः कृती ॥ ८६॥

पर्जन्यः कुमुदो भूतावासः कमललोचनः ।

श्रीवत्सवक्षाः श्रीवासो वीरहा लक्ष्मणाग्रजः ॥ ८७॥

लोकाभिरामो लोकारिमर्दनः सेवकप्रियः ।

सनातनतमो मेघश्यामलो राक्षसान्तकः ॥ ८८॥

दिव्यायुधधरः श्रीमानप्रमेयो जितेन्द्रियः ।

भूदेववन्द्यो जनकप्रियकृत्प्रपितामहः ॥ ८९॥

उत्तमः सात्विकः सत्यः सत्यसन्धस्त्रिविक्रमः ।

सुवृत्तः सुगमः सूक्ष्मः सुघोषः सुखदः सुहृत् ॥ ९०॥

दामोदरोऽच्युतः शार्ङ्गी वामनो मथुराधिपः ।

देवकीनन्दनः शौरिः शूरः कैटभमर्दनः ॥ ९१॥

सप्ततालप्रभेत्ता च मित्रवंशप्रवर्धनः ।

कालस्वरूपी कालात्मा कालः कल्याणदः कलिः ॥ ९२॥ 400

संवत्सरो ऋतुः पक्षो ह्ययनं दिवसो युगः ।

स्तव्यो विविक्तो निर्लेपः सर्वव्यापी निराकुलः ॥ ९३॥

अनादिनिधनः सर्वलोकपूज्यो निरामयः ।

रसो रसज्ञः सारज्ञो लोकसारो रसात्मकः ॥ ९४॥

सर्वदुःखातिगो विद्याराशिः परमगोचरः ।

शेषो विशेषो विगतकल्मषो रघुपुङ्गवः ॥ ९५॥

वर्णश्रेष्ठो वर्णभाव्यो वर्णो वर्णगुणोज्ज्वलः ।

कर्मसाक्षी गुणश्रेष्ठो देवः सुरवरप्रदः ॥ ९६॥

देवाधिदेवो देवर्षिर्देवासुरनमस्कृतः ।

सर्वदेवमयश्चक्री शाङ्र्गपाणी रघूत्तमः ॥ ९७॥

मनोगुप्तिरहङ्कारः प्रकृतिः पुरुषोऽव्ययः ।

न्यायो न्यायी नयी श्रीमान् नयो नगधरो ध्रुवः ॥ ९८॥

लक्ष्मीविश्वम्भरो भर्ता देवेन्द्रो बलिमर्दनः ।

बाणारिमर्दनो यज्वानुत्तमो मुनिसेवितः ॥ ९९॥

देवाग्रणीः शिवध्यानतत्परः परमः परः ।

सामगेयः प्रियः शूरः पूर्णकीर्तिः सुलोचनः ॥ १००॥

अव्यक्तलक्षणो व्यक्तो दशास्यद्विपकेसरी ।

कलानिधिः कलानाथः कमलानन्दवर्धनः ॥ १०१॥

पुण्यः पुण्याधिकः पूर्णः पूर्वः पूरयिता रविः ।

जटिलः कल्मषध्वान्तप्रभञ्जनविभावसुः ॥ १०२॥

जयी जितारिः सर्वादिः शमनो भवभञ्जनः ।

अलङ्करिष्णुरचलो रोचिष्णुर्विक्रमोत्तमः ॥ १०३॥

आशुः शब्दपतिः शब्दगोचरो रञ्जनो लघुः ।

निःशब्दपुरुषो मायो स्थूलः सूक्ष्मो विलक्षणः ॥ १०४॥ 500

आत्मयोनिरयोनिश्च सप्तजिह्वः सहस्रपात् ।

सनातनतमः स्रग्वी पेशलो विजितांबरः ॥ १०५॥

शक्तिमान् शङ्खभृन्नाथो गदाधररथाङ्गभृत् ।

निरीहो निर्विकल्पश्च चिद्रूपो वीतसाध्वसः ॥ १०६॥

सनातनः सहस्राक्षः शतमूर्तिर्घनप्रभः ।

हृत्पुण्डरीकशयनः कठिनो द्रव एव च ॥ १०७॥

सूर्यो ग्रहपतिः श्रीमान् समर्थोऽनर्थनाशनः ।

अधर्मशत्रू रक्षोघ्नः पुरुहूतः पुरस्तुतः ॥ १०८॥

ब्रह्मगर्भो बृहद्गर्भो धर्मधेनुर्धनागमः ।

हिरण्यगर्भो ज्योतिष्मान् सुललाटः सुविक्रमः ॥ १०९॥

शिवपूजारतः श्रीमान् भवानीप्रियकृद्वशी ।

नरो नारायणः श्यामः कपर्दी नीललोहितः ॥ ११०॥

रुद्रः पशुपतिः स्थाणुर्विश्वामित्रो द्विजेश्वरः ।

मातामहो मातरिश्वा विरिञ्चिर्विष्टरश्रवाः ॥ १११॥

अक्षोभ्यः सर्वभूतानां चण्डः सत्यपराक्रमः ।

वालखिल्यो महाकल्पः कल्पवृक्षः कलाधरः ॥ ११२॥

निदाघस्तपनो मेघः शुक्रः परबलापहृत् ।

वसुश्रवाः कव्यवाहः प्रतप्तो विश्वभोजनः ॥ ११३॥

रामो नीलोत्पलश्यामो ज्ञानस्कन्दो महाद्युतिः ।

कबन्धमथनो दिव्यः कम्बुग्रीवः शिवप्रियः ॥ ११४॥

सुखी नीलः सुनिष्पन्नः सुलभः शिशिरात्मकः ।

असंसृष्टोऽतिथिः शूरः प्रमाथी पापनाशकृत् ॥ ११५॥

पवित्रपादः पापारिर्मणिपूरो नभोगतिः ।

उत्तारणो दुष्कृतिहा दुर्धर्षो दुःसहो बलः ॥ ११६॥ 600

अमृतेशोऽमृतवपुर्धर्मी धर्मः कृपाकरः ।

भगो विवस्वानादित्यो योगाचार्यो दिवस्पतिः ॥ ११७॥

उदारकीर्तिरुद्योगी वाङ्मयः सदसन्मयः ।

नक्षत्रमानी नाकेशः स्वाधिष्ठानः षडाश्रयः ॥ ११८॥

चतुर्वर्गफलं वर्णशक्तित्रयफलं निधिः ।

निधानगर्भो निर्व्याजो निरीशो व्यालमर्दनः ॥ ११९॥

श्रीवल्लभः शिवारंभः शान्तो भद्रः समञ्जयः ।

भूशायी भूतकृद्भूतिर्भूषणो भूतभावनः ॥ १२०॥

अकायो भक्तकायस्थः कालज्ञानी महापटुः ।

परार्धवृत्तिरचलो विविक्तः श्रुतिसागरः ॥ १२१॥

स्वभावभद्रो मध्यस्थः संसारभयनाशनः ।

वेद्यो वैद्यो वियद्गोप्ता सर्वामरमुनीश्वरः ॥ १२२॥

सुरेन्द्रः कारणं कर्मकरः कर्मी ह्यधोक्षजः ।

धैर्योऽग्रधुर्यो धात्रीशः सङ्कल्पः शर्वरीपतिः ॥ १२३॥

परमार्थगुरुर्दृष्टिः सुचिराश्रितवत्सलः ।

विष्णुर्जिष्णुर्विभुर्यज्ञो यज्ञेशो यज्ञपालकः ॥ १२४॥

प्रभुर्विष्णुर्ग्रसिष्णुश्च लोकात्मा लोकपालकः ।

केशवः केशिहा काव्यः कविः कारणकारणम् ॥ १२५॥

कालकर्ता कालशेषो वासुदेवः पुरुष्टुतः ।

आदिकर्ता वराहश्च वामनो मधुसूदनः ॥ १२६॥

नारायणो नरो हंसो विष्वक्सेनो जनार्दनः ।

विश्वकर्ता महायज्ञो ज्योतिष्मान्पुरुषोत्तमः ॥ १२७॥ 700

वैकुण्ठः पुण्डरीकाक्षः कृष्णः सूर्यः सुरार्चितः ।

नारसिंहो महाभीमो वज्रदंष्ट्रो नखायुधः ॥ १२८॥

आदिदेवो जगत्कर्ता योगीशो गरुडध्वजः ।

गोविन्दो गोपतिर्गोप्ता भूपतिर्भुवनेश्वरः ॥ १२९॥

पद्मनाभो हृषीकेशो धाता दामोदरः प्रभुः ।

त्रिविक्रमस्त्रिलोकेशो ब्रह्मेशः प्रीतिवर्धनः ॥ १३०॥

संन्यासी शास्त्रतत्त्वज्ञो मन्दिरो गिरिशो नतः ।

वामनो दुष्टदमनो गोविन्दो गोपवल्लभः ॥ १३१॥

भक्तप्रियोऽच्युतः सत्यः सत्यकीर्तिर्धृतिः स्मृतिः ।

कारुण्यः करुणो व्यासः पापहा शान्तिवर्धनः ॥ १३२॥

बदरीनिलयः शान्तस्तपस्वी वैद्युतः प्रभुः ।

भूतावासो महावासो श्रीनिवासः श्रियः पतिः ॥ १३३॥

तपोवासो मुदावासः सत्यवासः सनातनः ।

पुरुषः पुष्करः पुण्यः पुष्कराक्षो महेश्वरः ॥ १३४॥

पूर्णमूर्तिः पुराणज्ञः पुण्यदः प्रीतिवर्धनः ।

पूर्णरूपः कालचक्रप्रवर्तनसमाहितः ॥ १३५॥

नारायणः परञ्ज्योतिः परमात्मा सदाशिवः ।

शङ्खी चक्री गदी शाङ्र्गी लाङ्गली मुसली हली ॥ १३६॥

किरीटी कुण्डली हारी मेखली कवची ध्वजी ।

योद्धा जेता महावीर्यः शत्रुघ्नः शत्रुतापनः ॥ १३७॥

शास्ता शास्त्रकरः शास्त्रं शङ्करः शङ्करस्तुतः ।

सारथी सात्त्विकः स्वामी सामवेदप्रियः समः ॥ १३८॥ 800

पवनः संहितः शक्तिः सम्पूर्णाङ्गः समृद्धिमान् ।

स्वर्गदः कामदः श्रीदः कीर्तिदः कीर्तिदायकः ॥ १३९॥

मोक्षदः पुण्डरीकाक्षः क्षीराब्धिकृतकेतनः ।

सर्वात्मा सर्वलोकेशः प्रेरकः पापनाशनः ॥ १४०॥

वैकुण्ठः पुण्डरीकाक्षः सर्वदेवनमस्कृतः ।

सर्वव्यापी जगन्नाथः सर्वलोकमहेश्वरः ॥ १४१॥

सर्गस्थित्यन्तकृद्देवः सर्वलोकसुखावहः ।

अक्षयः शाश्वतोऽनन्तः क्षयवृद्धिविवर्जितः ॥ १४२॥

निर्लेपो निर्गुणः सूक्ष्मो निर्विकारो निरञ्जनः ।

सर्वोपाधिविनिर्मुक्तः सत्तामात्रव्यवस्थितः ॥ १४३॥

अधिकारी विभुर्नित्यः परमात्मा सनातनः ।

अचलो निश्चलो व्यापी नित्यतृप्तो निराश्रयः ॥ १४४॥

श्यामी युवा लोहिताक्षो दीप्त्या शोभितभाषणः ।

आजानुबाहुः सुमुखः सिंहस्कन्धो महाभुजः ॥ १४५॥

सत्त्ववान् गुणसम्पन्नो दीप्यमानः स्वतेजसा ।

कालात्मा भगवान् कालः कालचक्रप्रवर्तकः ॥ १४६॥

नारायणः परञ्ज्योतिः परमात्मा सनातनः ।

विश्वकृद्विश्वभोक्ता च विश्वगोप्ता च शाश्वतः ॥ १४७॥

विश्वेश्वरो विश्वमूर्तिर्विश्वात्मा विश्वभावनः ।

सर्वभूतसुहृच्छान्तः सर्वभूतानुकम्पनः ॥ १४८॥

सर्वेश्वरः सर्वशर्वः सर्वदाऽऽश्रितवत्सलः ।

सर्वगः सर्वभूतेशः सर्वभूताशयस्थितः ॥ १४९॥

अभ्यन्तरस्थस्तमसश्छेत्ता नारायणः परः ।

अनादिनिधनः स्रष्टा प्रजापतिपतिर्हरिः ॥ १५०॥

नरसिंहो हृषीकेशः सर्वात्मा सर्वदृग्वशी ।

जगतस्तस्थुषश्चैव प्रभुर्नेता सनातनः ॥ १५१॥ 900

कर्ता धाता विधाता च सर्वेषां पतिरीश्वरः ।

सहस्रमूर्धा विश्वात्मा विष्णुर्विश्वदृगव्ययः ॥ १५२॥

पुराणपुरुषः श्रेष्ठः सहस्राक्षः सहस्रपात् ।

तत्त्वं नारायणो विष्णुर्वासुदेवः सनातनः ॥ १५३॥

परमात्मा परंब्रह्म सच्चिदानन्दविग्रहः ।

परञ्ज्योतिः परन्धाम पराकाशः परात्परः ॥ १५४॥

अच्युतः पुरुषः कृष्णः शाश्वतः शिव ईश्वरः ।

नित्यः सर्वगतः स्थाणू रुद्रः साक्षी प्रजापतिः ॥ १५५॥

हिरण्यगर्भः सविता लोककृल्लोकभुग्विभुः ।

Oङ्कारवाच्यो भगवान् श्रीभूलीलापतिः प्रभुः ॥ १५६॥

सर्वलोकेश्वरः श्रीमान् सर्वज्ञः सर्वतोमुखः ।

स्वामी सुशीलः सुलभः सर्वगः सर्वशक्तिमान् ॥ १५७॥

नित्यः सम्पूर्णकामश्च नैसर्गिकसुहृत्सुखी ।

कृपापीयूषजलधिः शरण्यः सर्वशक्तिमान् ॥ १५८॥

श्रीमान्नारायणः स्वामी जगतां प्रभुरीश्वरः ।

मत्स्यः कूर्मो वराहश्च नारसिंहोऽथ वामनः ॥ १५९॥

रामो रामश्च कृष्णश्च बौद्धः कल्की परात्परः ।

अयोध्येशो नृपश्रेष्ठः कुशबालः परन्तपः ॥ १६०॥

लवबालः कञ्जनेत्रः कञ्जाङ्घ्रिः पङ्कजाननः ।

सीताकान्तः सौम्यरूपः शिशुजीवनतत्परः ॥ १६१॥

सेतुकृच्चित्रकूटस्थः शबरीसंस्तुतः प्रभुः ।

योगिध्येयः शिवध्येयः शास्ता रावणदर्पहा ॥ १६२॥

श्रीशः शरण्यो भूतानां संश्रिताभीष्टदायकः ।

अनन्तः श्रीपती रामो गुणभृन्निर्गुणो महान् ॥ १६३॥ 1000

एवमादीनि नामानि ह्यसङ्ख्यान्यपराणि च ।

एकैकं नाम रामस्य सर्वपापप्रणाशनम् ॥ १६४॥

सहस्रनामफलदं सर्वैश्वर्यप्रदायकम् ।

सर्वसिद्धिकरं पुण्यं भुक्तिमुक्तिफलप्रदम् ॥ १६५॥

मन्त्रात्मकमिदं सर्वं व्याख्यातं सर्वमङ्गलम् ।

उक्तानि तव पुत्रेण विघ्नराजेन धीमता ॥ १६६॥

सनत्कुमाराय पुरा तान्युक्तानि मया तव ।
यः पठेच्छृणुयाद्वापि स तु ब्रह्मपदं लभेत् ॥ १६७॥

तावदेव बलं तेषां महापातकदन्तिनाम् ।
यावन्न श्रूयते रामनामपञ्चाननध्वनिः ॥ १६८॥

ब्रह्मघ्नश्च सुरापश्च स्तेयी च गुरुतल्पगः ।
शरणागतघाती च मित्रविश्वासघातकः ॥ १६९॥

मातृहा पितृहा चैव भ्रूणहा वीरहा तथा ।
कोटिकोटिसहस्राणि ह्युपपापानि यान्यपि ॥ १७०॥

संवत्सरं क्रमाज्जप्त्वा प्रत्यहं रामसन्निधौ ।
निष्कण्टकं सुखं भुक्त्वा ततो मोक्षमवाप्नुयात् ॥ १७१॥

श्रीरामनाम्नां परमं सहस्रकं पापापहं सौख्यविवृद्धिकारकम् ।
भवापहं भक्तजनैकपालकं स्त्रीपुत्रपौत्रप्रदमृद्धिदायकम् ॥

इति श्रीशतकोटिरामचरितान्तर्गते श्रीमदानन्दरामायणे वाल्मीकीये
राज्यकाण्डे पूर्वार्धे श्रीरामसहस्रनामकथनं नाम प्रथमः सर्गः ॥

]hrule

Encoded and poofread by PSA Easwaran psaeaswaran at gmail

Verse numbers are as per the Ananda Ramayana and have not been reset to start with 1.

Please send corrections to sanskrit@cheerful.com

Last updated ् today

http://sanskritdocuments.org

Rama Sahasranama Stotram ( From Ananda Ramayana ) Lyrics in Devanagari PDF
% File name : rama1000Ananda.itx
% Category : sahasranAma
% Location : doc_raama
% Author : Valmiki
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : PSA Easwaran psaeaswaran at gmail
% Proofread by : PSA Easwaran psaeaswaran at gmail
% Description/comments : shrImadAnandarAmAyaNe rAjyakANDe pUrvArdhe prathamaH sargaH
% Latest update : September 6, 2014
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ December 9, 2015 ] at Stotram Website